# पुरुषोत्तमयोगः (puruṣottama-yogaḥ)

| | | |
|---|---|---|
| ॐ श्रीपरमात्मने नमः। अथ पञ्चदशोऽध्यायः। पुरुषोत्तमयोगः।<br>om śrīparamātmane namaḥ. atha pañcadaśo'dhyāyaḥ. puruṣottamayogaḥ. | | |
| 1. | श्रीभगवानुवाच।<br>ऊर्ध्वमूलमधःशाखम् अश्वत्थं प्राहुरव्ययम्।<br>छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥ | śrībhagavānuvāca<br>ūrdhvamūlamadhaḥśākham<br>aśvatthaṁ prāhuravyayam<br>chandāṁsi yasya parṇāni<br>yastaṁ veda sa vedavit |
| 2. | अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः<br>गुणप्रवृद्धा विषयप्रवालाः।<br>अधश्च मूलान्यनुसन्ततानि<br>कर्मानुबन्धीनि मनुष्यलोके॥ | adhaścordhvaṁ prasṛtāstasya śākhāḥ<br>guṇapravṛddhā viṣayapravālāḥ<br>adhaśca mūlānyanusantatāni<br>karmānubandhīni manuṣyaloke |
| 3. | न रूपमस्येह तथोपलभ्यते<br>नान्तो न चादिर्न च सम्प्रतिष्ठा।<br>अश्वत्थमेनं सुविरूढमूलम्<br>असङ्गशस्त्रेण दृढेन छित्त्वा॥ | na rūpamasyeha tathopalabhyate<br>nānto na cādirna ca sampratiṣṭhā<br>aśvatthamenaṁ suvirūḍhamūlam<br>asaṅgaśastreṇa dṛḍhena chittvā |
| 4. | ततः पदं तत्परिमार्गितव्यम्<br>यस्मिन्गता न निवर्तन्ति भूयः।<br>तमेव चाद्यं पुरुषं प्रपद्ये<br>यतः प्रवृत्तिः प्रसृता पुराणी॥ | tataḥ padaṁ tatparimārgitavyam<br>yasmingatā na nivartanti bhūyaḥ<br>tameva cādyaṁ puruṣaṁ prapadye<br>yataḥ pravṛttiḥ prasṛtā purāṇī |
| 5. | निर्मानमोहा जितसङ्गदोषाः<br>अध्यात्मनित्या विनिवृत्तकामाः।<br>द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैः<br>गच्छन्त्यमूढाः पदमव्ययं तत्॥ | nirmānamohā jitasaṅgadoṣāḥ<br>adhyātmanityā vinivṛttakāmāḥ<br>dvandvairvimuktāḥ sukhaduḥkhasañjñaiḥ<br>gacchantyamūḍhāḥ padamavyayaṁ tat |
| 6. | न तद्भासयते सूर्यः न शशाङ्को न पावकः।<br>यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥ | na tadbhāsayate sūryaḥ<br>na śaśāṅko na pāvakaḥ<br>yadgatvā na nivartante<br>taddhāma paramaṁ mama |

| | | |
|---|---|---|
| 7. | ममैवांशो जीवलोके जीवभूतः सनातनः।<br>मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥ | mamaivāṁśo jīvaloke<br>jīvabhūtaḥ sanātanaḥ<br>manaḥṣaṣṭhānīndriyāṇi<br>prakṛtisthāni karṣati |
| 8. | शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।<br>गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥ | śarīraṁ yadavāpnoti<br>yaccāpyutkrāmatīśvaraḥ<br>gṛhītvaitāni saṁyāti<br>vāyurgandhānivāśayāt |
| 9. | श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।<br>अधिष्ठाय मनश्चायम् विषयानुपसेवते॥ | śrotraṁ cakṣuḥ sparśanaṁ ca<br>rasanaṁ ghrāṇameva ca<br>adhiṣṭhāya manaścāyam<br>viṣayānupasevate |
| 10. | उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।<br>विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥ | utkrāmantaṁ sthitaṁ vāpi<br>bhuñjānaṁ vā guṇānvitam<br>vimūḍhā nānupaśyanti<br>paśyanti jñānacakṣuṣaḥ |
| 11. | यतन्तो योगिनश्चैनम् पश्यन्त्यात्मन्यवस्थितम्।<br>यतन्तोऽप्यकृतात्मानः नैनं पश्यन्त्यचेतसः॥ | yatanto yoginaścainam<br>paśyantyātmanyavasthitam<br>yatanto'pyakṛtātmānaḥ<br>nainaṁ paśyantyacetasaḥ |
| 12. | यदादित्यगतं तेजः जगद्भासयतेऽखिलम्।<br>यच्चन्द्रमसि यच्चाग्नौ तत्तेजोविद्धि मामकम्॥ | yadādityagataṁ tejaḥ<br>jagadbhāsayate'khilam<br>yaccandramasi yaccāgnau<br>tattejoviddhi māmakam |
| 13. | गामाविश्य च भूतानि धारयाम्यहमोजसा।<br>पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥ | gāmāviśya ca bhūtāni<br>dhārayāmyahamojasā<br>puṣṇāmi cauṣadhīḥ sarvāḥ<br>somo bhūtvā rasātmakaḥ |
| 14. | अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।<br>प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥ | ahaṁ vaiśvānaro bhūtvā<br>prāṇināṁ dehamāśritaḥ<br>prāṇāpānasamāyuktaḥ<br>pacāmyannaṁ caturvidham |

| | | |
|---|---|---|
| 15. | सर्वस्य चाहं हृदि सन्निविष्टः<br>मत्तः स्मृतिर्ज्ञानमपोहनं च।<br>वेदैश्च सर्वैरहमेव वेद्यः<br>वेदान्तकृद्वेदविदेव चाहम्॥ | sarvasya cāhaṁ hṛdi sanniviṣṭaḥ<br>mattaḥ smṛtirjñānamapohanaṁ ca<br>vedaiśca sarvairahameva vedyaḥ<br>vedāntakṛdvedavideva cāham |
| 16. | द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।<br>क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ | dvāvimau puruṣau loke<br>kṣaraścākṣara eva ca<br>kṣaraḥ sarvāṇi bhūtāni<br>kūṭastho'kṣara ucyate |
| 17. | उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।<br>यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ | uttamaḥ puruṣastvanyaḥ<br>paramātmetyudāhṛtaḥ<br>yo lokatrayamāviśya<br>bibhartyavyaya īśvaraḥ |
| 18. | यस्मात्क्षरमतीतोऽहम् अक्षरादपि चोत्तमः।<br>अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ | yasmātkṣaramatīto'ham<br>akṣarādapi cottamaḥ<br>ato'smi loke vede ca<br>prathitaḥ puruṣottamaḥ |
| 19. | यो मामेवमसम्मूढः जानाति पुरुषोत्तमम्।<br>स सर्वविद्भजति माम् सर्वभावेन भारत॥ | yo māmevamasammūḍhaḥ<br>jānāti puruṣottamam<br>sa sarvavidbhajati mām<br>sarvabhāvena bhārata |
| 20. | इति गुह्यतमं शास्त्रम् इदमुक्तं मयानघ।<br>एतद्बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत॥ | iti guhyatamaṁ śāstram<br>idamuktaṁ mayānagha<br>etadbuddhvā buddhimānsyāt<br>kṛtakṛtyaśca bhārata |

ॐ तत्सत् ।

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥ श्रीकृष्णार्पणमस्तु ॥

om tatsat

iti śrīmadbhagavadgītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde puruṣottamayogo nāma pañcadaśo'dhyāyaḥ

śrīkṛṣṇārpaṇamastu